न्हि संक्रमणे पुण्यमहः कृत्स्नं प्रकीर्त्तितम् रात्रौ संक्रमणे पुण्यं दिनार्द्धं स्नानदानयोः अर्द्धरात्रादधस्तस्मिन् मध्याह्न
स्योपरि क्रिया ऊर्द्धं संक्रमणे चोर्द्धमुदयात्प्रहरद्वयम् पूर्णे चेदर्द्धरात्रे तु यदा संक्रमते रविः प्राहुर्दिनद्वयं पुण्यं।
मुक्त्वा मकरकर्कटाविति यत्तु अर्द्धरात्राद्र्वाक् संक्रमे पूर्वेद्युर्दिने तृतीयचतुर्थप्रहरौ पुण्यतमौ न त्वसायाह्नेपि स्नान
दानश्राद्धादि कार्यम् अर्द्धरात्रात्पूर्वं पंचनाडीसंक्रमे पूर्वोत्तरप्रहरद्वयं पुण्यमित्युक्तं विषुवन्मात्रविषयं तत्
विष्णुपदी षडशीति विषयम् तदुक्तम् विष्णुपद्यां धनुर्मीनन्वपुच्छकन्यासु चैव यदा पूर्वोत्तरगते रात्रौ भानोः सं
क्रमणं भवेत् पूर्वाह्ने पंचनाड्यस्तु पुण्याः प्रोक्ता मनीषिभिः अपराह्णे च पंचैव स्नाने दाने च कर्मणीति निशा
मवाक्यविरोधात् नायनविषयः तदा संपूर्णस्य दिनस्य पुण्यत्वम् तदाह याज्ञवल्क्यः अत्र तु संक्रमं पुण्यं
दिनार्द्धं स्नानदानयोः रात्रौ संक्रमणे भानोर्विषुवत्ययने दिनं पापाः सन्निहिता इति अत्र सन्निहितघटिका
या मन्यत्र मन्ये विष्णुपद्य अयनविशेषणान्न रात्रिगतानां सन्निहितानां तत्पुण्यतमत्वं व्यवच्छिद्यते दिनइ
ति पाठस्तु सर्वास्मिन्दिनं इत्यर्थः तथायमेणापि दिनार्द्धमिति केचित् निगमवाक्यं पुण्यातिशयप्रतिपादनार्थ
मिति स्वीकुर्वन्तः सर्वसंक्रान्तिषु अर्द्धरात्रात्प्रागूर्द्धं वा जातानामुदिनार्द्धं पुण्यमाह कंदर्पनारायणे तु धनुर्मीनाव
तिक्रम्य कन्यां च मिथुनं तथा पूर्वापरविभागेन रात्रौ संक्रमणे तिथौ दिनान्ते पंचनाड्यस्तु तदा पुण्यतमाः
स्मृताः उदये च तथा पंच दैवे पित्र्ये च कर्मणि उदये पुण्यतमा इति वचनात् पुण्यतममिति प्रतीयते रात्रावपि
महाफलत्वद्योतनार्थं न नियमार्थम् तेन विष्णुपद्यादावपि दिनार्द्धयोः पुण्यत्वेन विरोधः पूर्वोदाहृतवाक्यं
तस्यार्थं मुक्त्वा मकरकर्कटकाविन्त्ययमर्थः मुक्त्वापरित्यज्य मकरकर्कटकौ तयोस्तु निषिद्धये पुण्यत्वाभा
वः किंत्वर्द्धरात्रिपोर्द्धरात्रे कर्कटके सति पूर्वदिनं पुण्यं मकरे चोत्तरमिति सिद्धान्तः अत्र मकरकर्कटयो

जोम् चं॰ प्र॰ दिनद्वयमत्तत्पुण्यं २ किन्तु रात्रावेव तयोर्भोग इति केचित् अन्ये त्वित्थं व्याचक्षते पूर्णार्द्धरात्रे यातो मकरकर्कटौ यम्
१६ स्मात् वर्जयित्वा तत्पूर्वोर्द्दिनद्वयं पुण्यं न भवति ३ तत्पुण्यं अध्ययनाध्यापनयोरर्थं स्मृत्यर्थः तथा च स्मृतिः अन्हि चेद्रात्रि
युग्मं स्याद्द्वाभ्यां चेद्वासरद्वयम् संक्रान्तिः पक्षिणीत्येया ह्यनाध्ययनकर्म्मसु दिनद्वयं पुण्यं ज्ञेयम् तथा च रात्रौ मक
रकर्कटयोर्द्दिनद्वयं नाधीयते ध्यायकाध्येतीति संप्रदायः ॥ तदुक्तम् निशाद्वयं दिवा रात्रौ संक्रमे वासरद्वयम्
अनध्यायं प्रकुर्वीत दाने चैव विशेषतः नित्यत्वाध्यायदानादि कुर्वता तथा वस्मत्तेतरे नान्तरे घोस्त्वनध्याये होम
मंत्रेषु चैव हि वेदोपकरणे चैव नैत्रित्युइति यत्तु कार्तिके परित्यज्य कर्कं याति दिवाकरः प्रदोषे चार्द्धरात्रे वा तदा
भोगो परेहनीति वाक्यम् वो॰ प्रत्नापि अस्तंगते यदा सूर्ये मकरं याति दिवाकरः प्रदोषे चार्द्धरात्रे वा तदा पुण्यं दि
नान्तरे इति वाक्यमे कल्पतरुकारादिभिरलिखितत्वाद्बहुवाक्यविरोधाच्च नादरणीयमित्युक्ते अपरे त्वित्थं व्या
ऊः उत्तरवाक्ये प्रदोषे चेत्यनेन यदि प्रदोषजाता यामकद्वसंक्रान्तेः परदिने भोगः प्रतिपद्यते दानिशि संक्रम
पुण्यं दिनार्द्धं स्नानदानयोः रात्रौ संक्रमणे भानोर्विषुवत्ययने दिवेति यत्तु पार्श्वे विशेषवचनेन धनुर्मीनावतिक्र
म्येत्यादिना॰ पुराणवचनेन अर्द्धरात्रे चतुर्दयेस्तमयेपि वा मानार्द्धं भास्करे पुण्यं पूर्णे शार्वरीदलैरिति
देवीपुराणवचनेन च विरोधः स्यात् किंच अस्तंगते यदा सूर्ये इत्यनेनैवार्द्धरात्रयोर्लब्धत्वात् पृथग्ग्रहणमन
र्थकमिति पक्षे दोषः अर्द्धसंपूर्णे इत्यादेरयमर्थः अर्द्धसंपूर्णेर्द्धरात्रे संक्रमे भास्करे यस्मोर्द्ध प्रहरद्वयं तत्पुण्यं उ ना
दयेस्तमये पि चेत् उदयास्तमयपश्चात्प्रथमयोर्विदिनान्त्यः संध्याकालो लक्ष्यते तत्र प्रातःसंध्यायां सायंसंध्या
यां च संक्रान्तौ दिवसे प्रहरद्वयं पुण्यमिति गम्यते अस्तमये पूर्वदिनप्रहरद्वयं ग्राह्यं उदये तु परदिनयामद्व
यम् रात्रे न संध्या संक्रान्तिरपि निमित्ती न भवति संध्या च दिनरात्रिबहिर्भूता दिवा संध्यासु कर्णस्य इति स्मृतेः